दीक्षा-ग्रहण के बाद अवश्य अनुष्ठेय कर्म ये हैं — [1]यम और नियम का उसे पालन करना चाहिये। सन्ध्यावन्दन, शिवलिंग का पूजन, अग्निकार्य (हवन), गुरु के वचन का पालन और यथाशक्ति शिवभक्तों का पूजन उसे प्रतिदिन करते रहना चाहिये। जिन कार्यों का परित्याग करना चाहिये, वे निषिद्ध कर्म ये हैं — निर्माल्य-भक्षण, शिवनिन्दा, गुरुनिन्दा, शैवशास्त्रों में वर्णित आचार-विचार की निन्दा, देवता के निमित्त अर्पित द्रव्य आदि का स्वयं उपयोग और प्राणियों की हिंसा। अभिप्राय यह है कि दीक्षित व्यक्ति को इन निषिद्ध कार्यों का सदा वर्जन करना चाहिये।

दीक्षा-प्राप्ति के बाद शास्त्रोक्त कर्मों का यथाविधि अनुष्ठान में निरत रहनेवाले मुक्त स्थिति में पहुँचे हुए व्यक्ति में ये लक्षण प्रकट होते हैं — आणव, कार्म, मायीय, बैन्दव और रोधशक्ति नामक पाँचों पाशों[2] से वह मुक्त हो जाता है। परमेश्वर के समान उसमें भी [3]सर्वज्ञता, सर्वकर्तृता, नित्यतृप्तता, अनादिसिद्ध स्वतन्त्रता, अलुप्तशक्तिता और

---

१. 'गुरुनिन्दा' नास्ति–ग.। २. वृत्त्या–ख.। ३. 'तस्य' नास्ति–क.ग.। ४. 'पाशपञ्चकाद्' नास्ति–ख.। ५. विमुक्तश्च–क.। ६. सिद्धि–ख., बीज–म.। ७. भवन्ति–ख.ग.।

1. पाशुपत-मत के ग्रन्थों, स्मृतियों और पुराणों में भी यम और नियम के दस-दस भेदों का वर्णन मिलता है।
2. पाँच प्रकार के पाशों अथवा मलों के विषय में पृ. ३ की पहली टिप्पणी देखिये।
3. सर्वज्ञता आदि छः अंगों अथवा गुणों का विवरण शैवागम की सभी शाखाओं तथा पुराणों में भी मिलता है। पांचरात्र आगम तथा विष्णुपुराण आदि में वर्णित षाड्गुण्य की तथा सर्वज्ञता आदि छः अंगों की तुलना स्पन्दप्रदीपिकाकार उत्पल वैष्णव ने की है। लुप्ता० उपो० (पृ.१९०-१९१) की तीसरी टिप्पणी देखिये।

नास्ति, विषयासद्भावश्च। रागद्वेषादीनामविद्य[१]मानतया च सृष्ट्यन्तरे कर्तृतायामकरणम्। पञ्चविधकृत्येन तु परमेश्वर एव परानुग्रहं करोति।

[२]इति सर्वमतेष्विष्टा सा सिद्धान्तप्रकाशिका ।
सर्वात्मशम्भुना व्यक्ता कल्पिता शैवसंमता ।।

।। समाप्तश्चायं ग्रन्थः ।।

।। [३]हरिः ॐ शुभम् ।।

अनन्तशक्तिमत्ता — ये छः माहेश्वर गुण उसमें भी अभिव्यक्त हो उठते हैं, और उसको शिवस्वरूप की प्राप्ति हो जाती है, किन्तु इस तरह से अपने स्वरूप में [१]प्रतिष्ठित मुक्तात्मा में परमेश्वर के समान सृष्टि आदि पंचकृत्य करने की [२]सामर्थ्य नहीं आती। तो भी उसे सभी प्रकार के विषयों के बन्धन से मुक्ति अवश्य मिल जाती है। विषयों के अभाव में राग-द्वेष आदि दोषों के न रहने से भविष्य की सृष्टि में उसकी कोई कर्तृता नहीं रह जाती, अर्थात् आगे की सृष्टि में उसका जन्म नहीं होता। [३]पंचविध कृत्य केवल परमेश्वर में ही रहते हैं और इनकी सहायता से केवल ईश्वर ही दूसरों के ऊपर अनुग्रह कर सकता है, अर्थात् परमेश्वर के अतिरिक्त अन्य किसीमें पंचकृत्य करने की सामर्थ्य नहीं है।

इस प्रकार सभी मतों का प्रतिपादन करनेवाली इस सिद्धान्तप्रकाशिका की [४]सर्वात्मशंभु ने शैवसिद्धान्त की पद्धति के अनुसार स्पष्ट कल्पना की है।।

इस प्रकार यह ग्रन्थ समाप्त होता है ।।

।। हरिः ॐ शुभम् ।।

---

१. दीनां विद्यया तदा-क.। २. श्लोकोऽयं नास्ति-ग.। ३. 'हरिः ॐ शुभम्' नास्ति-ख.।

1. "स्वरूपप्रतिष्ठा वा चितिशक्तेः" (४.३३) इस योगसूत्र में स्वरूपप्रतिष्ठा की व्याख्या देखनी चाहिये।
2. पृ. ३२ की तीसरी टिप्पणी में उद्धृत अवधूत सिद्ध के वचन का अवलोकन कीजिये।
3. शैव, वैष्णव और शाक्त-क्रमदर्शन में प्रतिपादित पंचविध कृत्यों का विवरण सात्वतसंहिता के संस्कृत उपोद्घात (पृ.३१, टि.२) में तथा लुप्ता० उपो० (पृ.१२७-१२९ तथा टि.) में देखिये। क्रमदर्शन में शिव के समान जीव की भी पंचकृत्यकारिता बताई गई है। प्रत्यभिज्ञाहृदय, दशरूपक आदि में निरूपित पंचकृत्यों की सूचना हमारे ग्रन्थ "निगमागमीयं संस्कृतिदर्शनम्" (पृ.२५-२६ तथा टि.) से प्राप्त की जा सकती है।
4. ग्रन्थकार सर्वात्मशंभु का यथोपलब्ध परिचय प्रस्तावना में दिया जा रहा है।

* * *

प्रस्थानभेदः

मधुसूदनसरस्वतीकृतः

अथ सर्वेषां शास्त्राणां भगवत्येव तात्पर्यं साक्षात् परम्परया वेति समासेन तेषां प्रस्थानभेदोऽत्रोद्दिश्यते। तथाहि-ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेद इति वेदाश्चत्वारः। शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति वेदाङ्गानि षट्। पुराणन्यायमीमांसा धर्मशास्त्राणि चेति चत्वार्युपाङ्गानि। अत्रोपपुराणानामपि पुराणेऽन्तर्भावः। वैशेषिकशास्त्रस्य न्याये। वेदान्तशास्त्रस्य मीमांसायाम्। महाभारतरामायणयोः सांख्यपातञ्जल-पाशुपतवैष्णवादीनां च धर्मशास्त्रे। मिलित्वा चतुर्दश विद्याः। तथा चोक्तं याज्ञवल्क्येन —

> पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः ।
> वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ।। इति।
>
> (या० स्मृ० १.३)

एता एव चतुर्भिरुपवेदैः सहिता अष्टादश विद्या भवन्ति। आयुर्वेदो धनुर्वेदो गान्धर्ववेदोऽर्थशास्त्रं चेति चत्वार उपवेदाः। सर्वेषां चाऽऽस्तिकानामेतावन्त्येव शास्त्रप्रस्थानानि, अन्येषामप्येकदेशिनामेतेष्वेवान्तर्भावात्।

ननु नास्तिकानामपि प्रस्थानान्तराणि सन्ति, तान्येतेष्वनन्तर्भावात् पृथग् गणयितुमुचितानि। तथाहि-शून्यवादेनैकं प्रस्थानं माध्यमिकानाम्। क्षणिक-विज्ञानमात्रवादेनान्यद्योगाचाराणाम्। ज्ञानाकारानुमेयक्षणिकबाह्यार्थवादेनापरं सौत्रान्तिकानाम्। प्रत्यक्षस्वलक्षणक्षणिकबाह्यार्थवादेनापरं वैभाषिकाणाम्। एवं सौगतानां प्रस्थानचतुष्टयम्। तथा देहात्मवादेनैकं प्रस्थानं चार्वाकाणाम्। एवं देहाद्यतिरिक्त-देहपरिमाणात्मवादेन द्वितीयं प्रस्थानं दिगम्बराणाम्। एवं मिलित्वा नास्तिकानां षट् प्रस्थानानि। तानि कस्मान्नोच्यन्ते? सत्यम्, वेदबाह्यत्वात् तेषां म्लेच्छादिप्रस्थानवत् परम्परयाऽपि पुरुषार्थानुपयोगित्वादुपेक्षणीयत्वमेव। इह तु साक्षाद्वा परम्परया वा

पुमर्थोपयोगिनां वेदोपकारकाणामेव प्रस्थानानां भेदो दर्शितः। ततो न न्यूनत्वशङ्कावकाशः। अथ संक्षेपेणैषां प्रस्थानानां स्वरूपभेदहेतुप्रयोजनभेद उच्यते बालानां व्युत्पत्तये।

तत्र धर्मब्रह्मप्रतिपादकमपौरुषेयं प्रमाणवाक्यं वेदः। स च मन्त्रब्राह्मणात्मकः। तत्र मन्त्रा अनुष्ठानकारकभूतद्रव्यदेवताप्रकाशकाः। तेऽपि त्रिविधाः, ऋग्यजुःसामभेदात्। तत्र पादबद्धगायत्र्यादिच्छन्दोविशिष्टा ऋचः "अग्निमीळे पुरोहितम्" इत्याद्याः। ता एव गीतिविशिष्टाः सामानि। तदुभयविलक्षणानि यजूंषि। "अग्नीदग्नीन् विहर" इत्यादिसंबोधनरूपा निगदमन्त्रा अपि यजुरन्तर्भूता एव। तदेवं निरूपिता मन्त्राः।

ब्राह्मणमपि त्रिविधम्—विधिरूपमर्थवादरूपं तदुभयविलक्षणरूपं च। तत्र शब्दभावना विधिरिति भाट्टाः। नियोगो विधिरिति प्राभाकराः। इष्टसाधनता विधिरिति तार्किकादयः सर्वे। विधिरपि चतुर्विधः—उत्पत्त्यधिकारविनियोगप्रयोगभेदात्। तत्र कर्मस्वरूपमात्रबोधको विधिरुत्पत्तिविधिराग्नेयोऽष्टाकपालो भवतीत्यादिः। सेतिकर्तव्यताकस्य करणस्य यागादेः फलसम्बन्धबोधको विधिरधिकारविधिर्दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेत्यादिः। अङ्गसम्बन्धबोधको विधिर्विनियोगविधिर्व्रीहिभिर्यजेत, समिधो यजतीत्यादिः। साङ्गप्रधानकर्मप्रयोगैक्यबोधकः पूर्वोक्तविधित्रयमेलनरूपः प्रयोगविधिः। स च श्रौत इत्येके। कल्प्य इत्यपरे। कर्मस्वरूपं च द्विविधम्—गुणकर्मार्थकर्म च। तत्र क्रतुकर्मकारकाण्याश्रित्य विहितं गुणकर्म। तदपि चतुर्विधम्—उत्पत्त्याप्तिविकृतिसंस्कृतिभेदात्। तत्र वसन्ते ब्राह्मणोऽग्नीनादधीत, यूपं तक्षतीत्यादावाधानतक्षणादिना संस्कारविशेषविशिष्टाग्नियूपादेरुत्पत्तिः। स्वाध्यायोऽध्येतव्यः, गां पयो दोग्धीत्यादावध्ययनदोहनादिना विद्यमानस्यैव स्वाध्यायपयःप्रभृतेः प्राप्तिः। सोममभिषुणोति, व्रीहीनवहन्ति, आज्यं विलापयतीत्यादावभिषवावघातविलापनैः सोमादीनां विकारः। व्रीहीन् प्रोक्षति, पत्न्यवेक्षत इत्यादौ प्रोक्षणावेक्षणादिभिर्व्रीह्यादिद्रव्याणां संस्कारः। एतच्चतुष्टयं चाङ्गमेव। तथा क्रतुकारकाण्याश्रित्य विहितमर्थकर्म च द्विविधम्—अङ्गं प्रधानं च। अन्यार्थमङ्गम्। अनन्यार्थं प्रधानम्। अङ्गमपि द्विविधम्—संनिपत्योपकारकमारादुपकारकं च। तत्र प्रधानस्वरूपनिर्वाहकं प्रथमम्। फलोपकारि द्वितीयम्। एवं संपूर्णाङ्गसहितो विधिः प्रकृतिः। विकलाङ्गसंयुक्तो विधिर्विकृतिः। तदुभयविलक्षणो विधिर्दर्विहोमः। एवमन्यदप्यूह्यम्। तदेवं निरूपितो विधिभागः।

प्राशस्त्यनिन्दान्यतरलक्षणया विधिशेषभूतं वाक्यमर्थवादः। स च त्रिविधः—गुणवादोऽनुवादो भूतार्थवादश्चेति। तत्र प्रमाणान्तरविरुद्धार्थबोधको गुणवादः, आदित्यो

यूप इत्यादिः। प्रमाणान्तरप्राप्त्यर्थबोधकोऽनुवादः, अग्निर्हिमस्य भेषजमित्यादिः। प्रमाणान्तरविरोधतत्प्राप्तिरहितार्थबोधको भूतार्थवादः, इन्द्रो वृत्राय वज्रमुदयच्छदित्यादिः। तदुक्तम् —

विरोधे गुणवादः स्यादनुवादोऽवधारिते ।
भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः ।। इति।

तत्र त्रिविधानामप्यर्थवादानां विधिस्तुतिपरत्वे समानेऽपि भूतार्थवादानां स्वार्थेऽपि प्रामाण्यं देवताधिकरणन्यायात्। अबाधिताज्ञातज्ञापकत्वं हि प्रामाण्यम्। तच्चाबाधितविषयत्वाज्ज्ञातज्ञापकत्वाच्च न गुणवादानुवादयोः। भूतार्थस्य तु स्वार्थे तात्पर्यरहितस्याप्यौत्सर्गिकं प्रामाण्यं विहन्यते। तदेवं निरूपितोऽर्थवादभागः।

विध्यर्थवादोभयविलक्षणं तु वेदान्तवाक्यम्। तच्चाज्ञातज्ञापकत्वेऽप्यनुष्ठाना-प्रतिपादकत्वान्न विधिः, स्वतः पुरुषार्थपरमानन्दज्ञानात्मकब्रह्मणि स्वार्थ उपक्रमोपसंहारादिषड्विधतात्पर्यलिङ्गवत्तया स्वतः प्रमाणभूतं सर्वानपि विधीनन्तः-करणशुद्धिद्वारा स्वविशेषतामापादयदन्यशेषत्वाभावाच्च। तस्मादुभयविलक्षणमेव वेदान्तवाक्यम्। तच्च क्वचिदज्ञातज्ञापकत्वमात्रेण विधिरिति व्यपदिश्यते। क्वचिद् विधिपदरहितप्रमाणवाक्यत्वेन भूतार्थवाद इति व्यवह्रियत इति न दोषः। तदेवं निरूपितं त्रिविधं ब्राह्मणम्।

एवं च कर्मकाण्डब्रह्मकाण्डात्मको वेदो धर्मार्थकाममोक्षहेतुः। स च प्रयोगत्रयेण यज्ञनिर्वाहार्थमृग्यजुःसामभेदेन भिन्नः। तत्र हौत्रप्रयोग ऋग्वेदेन, आध्वर्यवप्रयोगो यजुर्वेदेन, औद्गात्रप्रयोगः सामवेदेन। ब्राह्मयाजमानप्रयोगौ त्वत्रैवान्तर्भूतौ। अथर्ववेदस्तु यज्ञानुपयुक्तः शान्तिकपौष्टिकाभिचारादिकर्मप्रतिपादकत्वेनात्यन्तविलक्षण एव। एवं प्रवचनभेदात् प्रतिवेदं भिन्ना भूयस्यः शाखाः। एवं च कर्मकाण्डे व्यापारभेदेऽपि सर्वासां वेदशाखानामेकरूपत्वमेव ब्रह्मकाण्डे।

इति चतुर्णां वेदानां प्रयोजनभेदेन भेद उक्तः। अथाङ्गानामुच्यते। तत्र शिक्षाया उदात्तानुदात्तस्वरितह्रस्वदीर्घप्लुतादिविशिष्टस्वरव्यञ्जनात्मकवर्णोच्चारविशेषज्ञानं प्रयो-जनम्, तदभावे मन्त्राणामनर्थकत्वात्। तथा चोक्तम् —

मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ।। इति।
(पा०शि०५२)

तत्र सर्ववेदसाधारणी शिक्षा। अथ शीक्षां प्रवक्ष्यामीत्यादिपञ्चखण्डात्मिका पाणिनिना प्रकाशिता। प्रतिवेदशाखं च भिन्नरूपा प्रातिशाख्यसंज्ञिताऽन्यैरेव मुनिभिः प्रदर्शिता। एवं वैदिकपदसाधुत्वज्ञानेनोहापोहादिकं व्याकरणस्य प्रयोजनम्। तच्च वृद्धिरादैजित्याद्यध्यायाष्टकात्मकं महेश्वरप्रसादेन भगवता पाणिनिनैव विरचितम्। पाणिनीयसूत्रेषु कात्यायनेन मुनिना वार्त्तिकं विरचितम्। तद्वार्त्तिकस्योपरि च भगवता पतञ्जलिना महाभाष्यमारचि। तदेतत्त्रिमुनि व्याकरणं वेदाङ्गं माहेश्वरमित्याख्यायते। कौमारादिव्याकरणानि तु न वेदाङ्गानि, किन्तु लौकिकप्रयोगमात्रज्ञानार्थानीत्यवगन्तव्यम्।

एवं शिक्षाव्याकरणाभ्यां वर्णोच्चारणपदसाधुत्वे ज्ञाते वैदिकमन्त्रपदानामर्थ-ज्ञानाकाङ्क्षायां तदर्थं भगवता यास्केन "समाम्नायः समाम्नातः स व्याख्यातव्यः" इत्यादित्रयोदशाध्यायात्मकं निरुक्तमारचितम्। तत्र च नामाख्यातनिपातोपसर्गभेदेन चतुर्विधं पदजातं निरूप्य वैदिकमन्त्रपदार्थानामर्थः प्रकाशितः। मन्त्राणां चानुष्ठेयार्थप्रका-शनद्वारेणैव करणत्वात् पदार्थज्ञानाधीनत्वाच्च वाक्यार्थज्ञानस्य मन्त्रस्थपदार्थज्ञानाय निरुक्तमवश्यमपेक्षितम्, अन्यथाऽनुष्ठानासंभवात्, "सृण्येव जर्भरी तुर्फरीतू" इत्यादिदुरूहाणां शब्दानां (निरु० १३.५) प्रकारान्तरेणार्थज्ञानस्यासंभवनीयत्वाच्च। एवं निघण्टवोऽपि वैदिकद्रव्यदेवतात्मकपदार्थपर्यायशब्दात्मका निरुक्तान्तर्भूता एव। तत्रापि निघण्टुसंज्ञकः पञ्चाध्यायात्मको ग्रन्थो भगवता यास्केनैव कृतः।

एवमृङ्मन्त्राणां पादबद्धच्छन्दोविशेषविशिष्टत्वात्तदज्ञाने च निन्दाश्रवणाच्छन्दो-विशेषनिमित्तानुष्ठानविशेषविधानाच्च छन्दोज्ञानाकाङ्क्षायां तत्प्रकाशनाय "धीः श्रीः स्त्रीम्" इत्याद्यष्टाध्यायात्मिका छन्दोविचितिर्भगवता पिङ्गलेन विरचिता। तत्राप्यलौकिकमित्यन्तेनाध्यायत्रयेण गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगतीति सप्तच्छन्दांसि सावान्तरभेदानि निरूपितानि। अथ लौकिकमित्यारभ्याध्यायपञ्चकेन पुराणेतिहासादावुपयोगीनि लौकिकानि च्छन्दांसि प्रसङ्गान्निरूपितानि, व्याकरणे लौकिकपदनिरूपणवत्।

एवं वैदिककर्माङ्गदर्शादिकालज्ञानाय ज्यौतिषं भगवताऽऽदित्येन गर्गादिभिश्च प्रणीतं बहुविधमेव।

शाखान्तरीयगुणोपसंहारेण वैदिकानुष्ठानक्रमविशेषज्ञानाय कल्पसूत्राणि। तानि च प्रयोगत्रयभेदात्त्रिविधानि-तत्र हौत्रप्रयोगप्रतिपादकान्याश्वलायनशाङ्खायना-दिप्रणीतानि, आध्वर्यवप्रयोगप्रतिपादकानि बौधायनापस्तम्बकात्यायनादिप्रणीतानि, औद्गात्रप्रयोगप्रतिपादकानि लाट्यायनद्राह्यायणादिप्रणीतानि।

एवं निरूपितः षण्णामङ्गानां प्रयोजनभेदः। चतुर्णामुपाङ्गानामधुनोच्यते। तत्र सर्गप्रतिसर्गवंशमन्वन्तरवंशानुचरितप्रतिपादकानि भगवता बादरायणेन कृतानि पुराणानि। तानि च ब्राह्मं पाद्मं वैष्णवं शैवं भागवतं नारदीयं मार्कण्डेयमाग्नेयं भविष्यं ब्रह्मवैवर्तं लैङ्गं वाराहं स्कान्दं वामनं कौर्मं मात्स्यं गारुडं ब्रह्माण्डं चेत्यष्टादश।

आद्यं सनत्कुमारेण प्रोक्तं वेदविदां वराः ।
द्वितीयं नारसिंहाख्यं तृतीयं नान्दमेव च ॥
चतुर्थं शिवधर्माख्यं दौर्वासं पञ्चमं विदुः ।
षष्ठं तु नारदीयाख्यं कापिलं सप्तमं विदुः ॥
अष्टमं मानवं प्रोक्तं ततश्चोशनसेरितम् ।
ततो ब्रह्माण्डसंज्ञं तु वारुणाख्यं ततः परम् ॥
ततः कालीपुराणाख्यं वासिष्ठं मुनिपुङ्गवाः ।
ततो वासिष्ठलैङ्गाख्यं प्रोक्तं माहेश्वरं परम् ॥
ततः साम्बपुराणाख्यं ततः सौरं महाद्भुतम् ।
पाराशरं ततः प्रोक्तं मारीचाख्यं ततः परम् ॥
भार्गवाख्यं ततः प्रोक्तं सर्वधर्मार्थसाधकम् ।

एवमुपपुराणान्यनेकप्रकाराणि द्रष्टव्यानि।

न्याय आन्वीक्षिकी पञ्चाध्यायी गौतमेन प्रणीता। प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्त-सिद्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानाख्यानां षोडशपदार्थानामुद्देशलक्षणपरीक्षाभिस्तत्त्वज्ञानं तस्याः प्रयोजनम्। एवं दशाध्यायं वैशेषिकं शास्त्रं कणादेन प्रणीतम्। द्रव्यगुणकर्मसामान्यविशेषसमवायानां षण्णां पदार्थानामभावसप्तमानां साधर्म्यवैधर्म्याभ्यां व्युत्पादनं तस्य प्रयोजनम्। एतदपि न्यायपदेनोक्तम्।

एवं मीमांसाऽपि द्विविधा - कर्ममीमांसा शारीरकमीमांसा च। तत्र द्वादशा-ध्यायी कर्ममीमांसा "अथातो धर्मजिज्ञासा" इत्यादि "अन्वाहार्ये च दर्शनात्" इत्यन्ता भगवता जैमिनिना प्रणीता। तत्र धर्मप्रमाणम्, धर्मभेदाभेदौ, शेषशेषिभावः, क्रत्वर्थपुरुषार्थभेदेन प्रयुक्तिविशेषः, श्रुत्यर्थपठनादिभिः क्रमभेदः, अधिकारविशेषः, सामान्यातिदेशः, विशेषातिदेशः, ऊहः, बाधः, तन्त्रम्, प्रसङ्गश्चेति क्रमेण द्वादशाध्यायानामर्थाः। तथा संकर्षणकाण्डमप्यध्यायचतुष्टयात्मकं जैमिनिप्रणीतम्। तच्च देवताकाण्डसंज्ञया प्रसिद्धमप्युपासनाख्यकर्मप्रतिपादकत्वात् कर्ममीमांसान्तर्गतमेव।

तथा चतुरध्यायी शारीरकमीमांसा "अथातो ब्रह्मजिज्ञासा" इत्यादिः, "अनावृत्तिः शब्दात्" इत्यन्ता जीवब्रह्मैकत्वसाक्षात्कारहेतुः श्रवणाख्य-विचारप्रतिपादकान् न्यायानुपदर्शयन्ती भगवता बादरायणेन कृता। तत्र सर्वेषामपि वेदान्तवाक्यानां साक्षात् परम्परया वा प्रत्यगभिन्नाद्वितीये ब्रह्मणि तात्पर्यमिति समन्वयः प्रथमाध्यायेन प्रदर्शितः। तत्र च प्रथमे पादे स्पष्टब्रह्मलिङ्गयुक्तानि वाक्यानि विचारितानि, द्वितीये त्वस्पष्टलिङ्गान्युपास्यब्रह्मविषयाणि, तृतीये पादेऽस्पष्टब्रह्मलिङ्गानि प्रायशो ज्ञेयब्रह्मविषयाणि। एवं पादत्रयेण वाक्यविचारः समापितः। चतुर्थपादे तु प्रधानविषयत्वेन संदिह्यमानान्यव्यक्ताजादिपदानि चिन्तितानि। एवं वेदान्तानामद्वये ब्रह्मणि समन्वये सिद्धे तत्र संभावितस्मृतितर्कादि-प्रयुक्तैस्तर्कैर्विरोधमाशङ्क्य तत्परिहारः क्रियत इत्यविरोधो द्वितीयाध्यायेन दर्शितः। तत्राऽऽद्यपादे सांख्ययोगकाणादादिस्मृतिभिः सांख्यादिप्रयुक्तैस्तर्कैश्च विरोधो वेदान्तसमन्वयस्य परिहृतः। द्वितीये पादे सांख्यादिमतानां दुष्टत्वं प्रतिपादितम्, स्वपक्षस्थापनपरपक्षनिवारणरूपपर्वद्वयात्मकत्वाद्विचारस्य। तृतीये पादे महाभूतसृष्ट्यादिश्रुतीनां परस्परविरोधः पूर्वभागेन परिहृतः, उत्तरभागेन तु जीवविषयाणाम्। चतुर्थपादे त्विन्द्रियविषयश्रुतीनां विरोधः परिहृतः। तृतीयेऽध्याये साधननिरूपणम्। तत्र प्रथमे पादे जीवस्य परलोकगमनागमननिरूपणेन वैराग्यं निरूपितम्। द्वितीये पादे पूर्वभागेन त्वंपदार्थः शोधितः, उत्तरभागेन तत्पदार्थः। तृतीये पादे निर्गुणे ब्रह्मणि नानाशाखापठितपुनरुक्तपदोपसंहारः कृतः, प्रसङ्गाच्च सगुणनिर्गुणविद्यासु शाखान्तरीयगुणोपसंहारानुपसंहारौ निरूपितौ। चतुर्थे पादे निर्गुणब्रह्मविद्याया बहिरङ्गसाधनान्याश्रमयज्ञादीन्यन्तरङ्गसाधनानि शमदमनिदिध्यास-नादीनि च निरूपितानि। चतुर्थेऽध्याये सगुणनिर्गुणविद्ययोः फलविशेषनिर्णयः कृतः। तत्र प्रथमे पादे श्रवणाद्यावृत्त्या निर्गुणं ब्रह्म साक्षात्कृत्य जीवतः पापपुण्याऽलेपलक्षणा जीवन्मुक्तिरभिहिता। द्वितीये पादे म्रियमाणस्योत्क्रान्तिप्रकार-श्चिन्तितः। तृतीये पादे सगुणब्रह्मविदो मृतस्योत्तरमार्गोऽभिहितः। चतुर्थे पादे पूर्वभागेन निर्गुणब्रह्मविदो विदेहकैवल्यप्राप्तिरुक्ता, उत्तरभागेन सगुणब्रह्मविदो ब्रह्मलोकस्थितिरुक्तेति। इदमेव सर्वशास्त्राणां मूर्धन्यम्। शास्त्रान्तरं सर्वमस्यैव शेषभूतमितीदमेव मुमुक्षुभिरादरणीयं श्रीशङ्करभगवत्पादोदितप्रकारेणेति रहस्यम्।

एवं धर्मशास्त्राणि मनुयाज्ञवल्क्यविष्णुयमाङ्गिरोवसिष्ठदक्षसंवर्तशातातप-पराशरगौतमशङ्खलिखितहारीतापस्तम्बोशनोव्यासकात्यायनबृहस्पतिदेवलनारदपैठीन-

सिप्रभृतिभिः कृतानि वर्णाश्रमधर्मविशेषाणां विभागेन प्रतिपादकानि। एवं व्यासकृतं महाभारतं वाल्मीकिकृतं रामायणं च धर्मशास्त्र एवान्तर्भूतं स्वयमितिहासत्वेन प्रसिद्धम्। सांख्यादीनां धर्मशास्त्रान्तर्भावेऽपीह स्वशब्देनैव निर्देशात् पृथगेव संगतिर्वाच्या।

अथ वेदचतुष्टयस्य क्रमेण चत्वार उपवेदाः। तत्राऽऽयुर्वेदस्याष्टौ स्थानानि भवन्ति — सूत्रं शारीरमैन्द्रियं चिकित्सा निदानं विमानं विकल्पः सिद्धिश्चेति। ब्रह्मप्रजापत्यश्विधन्वन्तरीन्द्रभरद्वाजात्रेयाग्निवेश्यादिभिरुपदिष्टश्चरकेण संक्षिप्तः। तत्रैव सुश्रुतेन पञ्चस्थानात्मकं प्रस्थानान्तरं कृतम्। एवं वाग्भटादिनाऽपि बहुधेति न शास्त्रभेदः। कामशास्त्रमप्यायुर्वेदान्तर्गतमेव, तत्रैव सुश्रुतेन वाजीकरणाख्यकामशास्त्राभिधानात्। तत्र वात्स्यायनेन पञ्चाध्यायात्मकं कामशास्त्रं प्रणीतम्। तस्य च विषयवैराग्यमेव प्रयोजनम्, शास्त्रोद्दीपितमार्गेणापि विषयभोगे दुःखमात्रपर्यवसानात्। चिकित्साशास्त्रस्य रोगतत्साधनरोगनिवृत्तितत्साधनज्ञानं प्रयोजनम्।

एवं धनुर्वेदः पादचतुष्टयात्मको विश्वामित्रप्रणीतः। तत्र प्रथमो दीक्षापादः, द्वितीयः संग्रहपादः, तृतीयः सिद्धिपादः, चतुर्थः प्रयोगपादः। तत्र प्रथमे पादे धनुर्लक्षणमधिकारिनिरूपणं च कृतम्। अत्र धनुःशब्दश्चापे रूढोऽपि धनुर्विधायुधे प्रवर्तते। तच्चतुर्विधम्-मुक्तममुक्तं मुक्तामुक्तं यन्त्रमुक्तम्। मुक्तं चक्रादि, अमुक्तं खड्गादि, मुक्तामुक्तं शल्यावान्तरभेदादि, यन्त्रमुक्तं शरादि। तत्र मुक्तमस्त्रमुच्यते, अमुक्तं शस्त्रमित्युच्यते। तदपि ब्राह्मवैष्णवपाशुपतप्राजापत्याग्नेयादिभेदादनेकविधम्। एवं साधिदैवतेषु समन्त्रकेषु चतुर्विधायुधेषु येषामधिकारः क्षत्रियकुमाराणां तदनुयायिनां च, ते सर्वे चतुर्विधाः—पदातिरथगजतुरगारूढाः। दीक्षाभिषेकशकुनमङ्गलकरणादिकं च सर्वमपि प्रथमे पादे निरूपितम्। सर्वेषां शस्त्रविशेषाणामाचार्यस्य च लक्षणपूर्वकं संग्रहणप्रकारो दर्शितो द्वितीयपादे। गुरुसंप्रदायसिद्धानां शस्त्रविशेषाणां पुनः पुनरभ्यासो मन्त्रदेवतासिद्धिकरणमपि निरूपितं तृतीयपादे। एवं देवतार्चनाभ्यासादिभिः सिद्धानामस्त्रविशेषाणां प्रयोगश्चतुर्थपादे निरूपितः। क्षत्रियाणां स्वधर्माचरणं युद्धम्। दुष्टस्य दण्डश्चोरादिभ्यः प्रजापालनं च धनुर्वेदस्य प्रयोजनम्। एवं च ब्रह्मप्रजापत्यादिक्रमेण विश्वामित्रप्रणीतं धनुर्वेदशास्त्रम्।

एवं गान्धर्ववेदो भगवता भरतेन प्रणीतः। स गीतवाद्यनृत्यभेदेन बहुविधः। देवताराधनं निर्विकल्पकसमाध्यादिसिद्धिश्च गान्धर्ववेदस्य प्रयोजनम्।

एवमर्थशास्त्रमपि बहुविधम्। नीतिशास्त्रमश्वशास्त्रं शिल्पशास्त्रं सूपशास्त्रं चतुःषष्टिकलाशास्त्रं चेति। तत्सर्वं नानामुनिभिः प्रणीतम्। अस्य च सर्वस्य लौकिकवत् प्रयोजनभेदो द्रष्टव्यः।

एवमष्टादशविद्यास्त्रयीशब्देनोक्ताः, अन्यथा न्यूनताप्रसङ्गात्। तथा सांख्यशास्त्रं भगवता कपिलेन प्रणीतम्। तच्च "अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः" इत्यादि षडध्यायम्। तत्र प्रथमेऽध्याये विषया निरूपिताः, द्वितीयेऽध्याये प्रधानकार्याणि, तृतीयेऽध्याये विषयेभ्यो वैराग्यम्, चतुर्थेऽध्याये विरक्तानां पिङ्गलाकुररादीनामाख्यायिकाः, पञ्चमेऽध्याये परपक्षनिर्णयः, षष्ठेऽध्याये सर्वार्थसंक्षेपः। प्रकृतिपुरुषविवेकज्ञानं सांख्यशास्त्रस्य प्रयोजनम्।

तथा योगशास्त्रं भगवता पतञ्जलिना प्रणीतम् "अथ योगानुशासनम्" इत्यादि-पादचतुष्टयात्मकम्। तत्र प्रथमे पादे चित्तवृत्तिनिरोधात्मकः समाधिरभ्यासवैराग्यरूपं च तत्साधनं निरूपितम्, द्वितीये पादे विक्षिप्तचित्तस्यापि समाधिसिद्ध्यर्थं यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधय इत्यष्टाङ्गानि निरूपितानि, तृतीये पादे योगिविभूतयः, चतुर्थे पादे कैवल्यमिति। तस्य च विजातीयप्रत्ययनिरोधद्वारेण निदिध्यासनसिद्धिः प्रयोजनम्।

तथा पशुपतिमतं पाशुपतं शास्त्रं पशुपतिना पशुपाशविमोक्षणाय "अथातः पाशुपतं योगविधिं व्याख्यास्यामः" इत्यादि पञ्चाध्यायं विरचितम्। तत्राध्यायपञ्चकेनापि कार्यरूपो जीवः पशुः, कारणं पतिरीश्वरः, योगः पशुपतौ चित्तसमाधानम्, विधिर्भस्मना त्रिषवणस्नानादिश्च निरूपितः, दुःखान्तसंज्ञो मोक्षश्च प्रयोजनम्। एत एव कार्यकारणयोगविधिदुःखान्ता इत्याख्यायन्ते।

एवं वैष्णवं नारदादिभिः कृतं पाञ्चरात्रम्। तत्र वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धाश्चत्वारः पदार्था निरूपिताः। भगवान् वासुदेवः सर्वकारणं परमेश्वरः। तस्मादुत्पद्यते सङ्कर्षणाख्यो जीवः, तस्मान्मनः प्रद्युम्नः, तस्मादनिरुद्धोऽहङ्कारः। सर्वे चैते भगवतो वासुदेवस्यैवांशभूतास्तदभिन्ना एवेति भगवतो वासुदेवस्य मनोवाक्कायवृत्तिभिराराधनं कृत्वा कृतकृत्यो भवतीत्यादि च निरूपितम्।

तदेवं दर्शितः प्रस्थानभेदः। सर्वेषां च संक्षेपेण त्रिविध एव प्रस्थानभेदः। तत्राऽऽरम्भवाद एकः, परिणामवादो द्वितीयः, विवर्तवादस्तृतीयः। पार्थिवाप्यतैजसवायवीयाश्चतुर्विधाः परमाणवो द्व्यणुकादिक्रमेण ब्रह्माण्डपर्यन्तं जगदारभन्ते, असदेव

कार्यं कारकव्यापारादुत्पद्यत इति प्रथमस्तार्किकाणां मीमांसकानां च। सत्त्वरजस्तमोगुणात्मकं प्रधानमेव महदहङ्कारादिक्रमेण जगदाकारेण परिणमते, पूर्वमपि सूक्ष्मरूपेण सदेव कार्यं कारणव्यापारेणाभिव्यज्यत इति द्वितीयः पक्षः सांख्ययोगपातञ्जलपाशुपतानाम्। ब्रह्मणः परिणामो जगदिति वैष्णवानाम्। स्वप्रकाशपरमानन्दाद्वितीयं ब्रह्म स्वमायावशान्मिथ्यैव जगदाकारेण कल्पत इति तृतीयः पक्षो ब्रह्मवादिनाम्। सर्वेषां प्रस्थानकर्तृणां मुनीनां विवर्तवादपर्यवसानेनाद्वितीये परमेश्वर एव प्रतिपाद्ये तात्पर्यम्। नहि ते मुनयो भ्रान्ताः, सर्वज्ञत्वात् तेषाम्। किन्तु बहिर्विषयप्रवणानामापाततः पुरुषार्थे प्रवेशो न संभवतीति नास्तिक्यवारणाय तैः प्रकारभेदाः प्रदर्शिताः। तत्र तेषां तात्पर्यमबुद्ध्वा वेदविरुद्धेऽप्यर्थे तात्पर्यमुत्प्रेक्ष्यमाणास्तन्मतमेवोपादेयत्वेन गृह्णन्तो जना नानापथजुषो भवन्तीति सर्वमनवद्यम्।।

।। इति श्रीमधुसूदनसरस्वतीविरचितः प्रस्थानभेदः ।।

***

विशिष्टपदानुक्रमणी

अक्षपादः २२
अक्षराणि (एकपञ्चाशत्) १३,१५
अग्निकार्यम् ४२
अग्निवेश्यः ५१
अघोरः ३४,३७
अङ्गकर्म (द्विविधम्) ४६
अङ्गमन्त्राः (षट्) १५
अणिमादिसिद्धयः ३९
अतिदेशः (सामान्यविशेषात्मकः) ४९
अतिमार्गशास्त्रम् (त्रिविधम्) १९,३२-३४
अथर्ववेदः ४७
अदृष्टशास्त्रम् ३४
अद्वैतशास्त्रम् २६
अधःप्रलयः ३८
अधःस्रोतांसि (चत्वारि) ३४-३५
अधिकारतत्त्वम् १३
अधिकारमलम् १०
अधिकारविधिः ४६
अधिकारविशेषः ५०
अधोवक्त्राणि ३४
अध्यवसायः ४
अध्वा ७,१५-१६,१८
अनन्तः १०,४०
अनन्तशक्तिता ४३
अनन्तादयः (अष्टौ विद्येश्वराः) १०
अनादिसिद्धः २९
अनादिसिद्धस्वतन्त्रता ४३
अनाश्रितभुवनम् १५
अनिरुद्धः (अहङ्कारः) ३१,५२
अनुग्रहः ४४
अनुवादः ४६-४७
अन्तरङ्गसाधनानि ५०
अन्तःकरणम् ४
अन्तःकरणशुद्धिः ४७
अन्त्येष्टिक्रिया ४२
अन्त्येष्टिश्राद्धम् ३९
अपरे ४६
अपूर्वाख्यः संस्कारः १६
अपौरुषेयाः (वेदाः) १९-२०
अभावः (सप्तमपदार्थः) ४९
अभिमानः ४
अभिषेकः ५१
आचार्याभिषेकः ३८
अभ्यासः ५२
अर्थकर्म (द्विविधम्) ४६
अर्थकर्मलक्षणम् ४६
अर्थवादः (त्रिविधः) ४६-४७
अर्थवादलक्षणम् ४६-४७
अर्थशास्त्रम् ४५,५२
अर्हन् २९
अलुप्तशक्तिता ४३
अवकाशदानम् ५
अवयवघटनकरणम् ५
अवर्णविग्रहः १
अविद्या २३
अशुद्धमायातत्त्वम् ९,१६
अशुद्धाध्ववर्तिनः १७
अशुद्धाध्वा ७,११,१८

अश्वशास्त्रम् ५२
अष्टादशपुराणनामानि ४९
अष्टादशशास्त्राणि ३७
अष्टादशाधिकशतरुद्राः १०
अष्टाध्यायी ४८
अष्टाविंशतिशास्त्राणि ३७
अष्टौ स्थानानि (आयुर्वेदस्य) ५१
असत्यः २५,२८
असत्या २५
असद्योनिर्वाणदीक्षा ४०
अस्ति २९
अस्ति च नास्ति च २९
अस्त्रम् ५१
अस्थिधारणम् ३३
अहङ्कारः ४
अहङ्कारवृत्तिः ४
अहङ्कारसृष्टिः (त्रिविधा) ५
अहिंसा २९
आकाशः २०
आचारनिन्दा ४३
आचार्यः ४१
आचार्याभिषेकः ३८
आणवपाशः १८,३७,४३
आणवबन्धः १०,११
आणवमलम् २,३२-३३
आत्मज्ञानम् १९
आत्मलक्षणम् २,१६,२३,२५, ३२,३३,३८
आत्मानः २,१३,१६-१७,२०, २३-२४,२७-२८,३१-३२
आदित्यः ४८
आधाराः ३९
आध्यात्मिकं शास्त्रम् (त्रिविधम्) १९
आध्वर्यवप्रयोगः ४७-४८
आन्वीक्षिकी (पञ्चाध्यायी) ४९
आपस्तम्बः ४८
आप्तिकर्म ४६
आभिचारिकं कर्म ४७
आयुधं चतुर्विधम् (मुक्तम्, अमुक्तम्, मुक्तामुक्तम्, यन्त्रमुक्तम्) ५१
आयुधानि वज्रादीनि १०
आयुर्वेदः (अष्टौ स्थानानि) १९,४५,५१
आयुर्वेदशास्त्रप्रणेतारः ५१
आरम्भवादः ५२
आरादुपकारकम् ४६
आर्हतशास्त्रम् २७,२९,३५
आश्रमधर्माः ३०,५१
आश्वलायनः ४८
आस्तिकनास्तिकशास्त्राणि २६
आस्तिकाः ४५
इतिहासपुराणानि ३१
इतिहासः ५१
इन्द्रशत्रुः ४७
इन्द्रादिलोकपालाः १०
इष्टापूर्तम् २०
ईशानः ३७
ईश्वरः (षड्विंशतितत्त्वम्) ११,२०, २४,२७-३०,३२
ईश्वरतत्त्वम् ९,१०,१३
ईश्वरपदम् १२,४०
उत्क्रान्तिः ५०
उत्तरमार्गः ५०
उत्पत्तिकर्म ४६
उत्पत्तिविधिः ४६

उद्देशः ४९
उपक्रमः ४७
उपक्रमोपसंहारौ ४७
उपनिषद्भागः १९,३०
उपपुराणनामानि ४९
उपपुराणानि ४५
उपवेदाः (चत्वारः) ४५,५१
उपसंहारः ४७
उपाङ्गानि (चत्वारि) ४५,४९
उपासना ४९
ऊहः ४९
ऋग्लक्षणम् ४६
ऋग्यजुःसामाथर्वाणः ३०,४५,४७
ऋङ्मन्त्राः ४८
एकदेशिनः ४५
एकपञ्चाशदक्षराणि १३,१५
एकाशीतिपदानि १५
एके ४६
औत्सर्गिकम् ४७
औद्गात्रप्रयोगः ४७,४८
कणादः २२,४९
कपिलः २३,५२
कमण्डलुः ३९
करणदशकम् ३
कर्म (द्विविधम्–गुणकर्म अर्थकर्म च। गुणकर्म चतुर्विधम्, अर्थकर्म द्विविधं अङ्गकर्म द्विविधम् ४६
कर्मकाण्डम् ४७
कर्मक्षयः २१
कर्मपदार्थः २१
कर्मबन्धः १६
कर्ममीमांसा (द्वादशाध्यायी) ४९
कर्मस्वरूपम् ४६
कर्माणि (त्रिविधानि) ४०-४२
कर्मानुष्ठानम् २१
कर्मेन्द्रियाणि (तेषां व्यापाराश्च) ३,५
कलातत्त्वम् २.८,३६
कलाध्वा १५
कलामस्तकम् १२
कल्पः ३०
कल्पसूत्राणि (त्रिविधानि) ४८
कल्प्यः ४६
कात्यायनः (कल्पसूत्रकारः) ४८
कात्यायनः (वार्त्तिककारः) ४८
कापालम् १९,३४,३८
कापालिकशास्त्रम् ३३,३६
कामशास्त्रम् (पञ्चाध्यायम्) ५१
कामिकाद्यष्टाविंशतिसंहिताः ९,१३,३७
कायः २९
कारणम् ५२
कारणबिन्दुः १४
कार्मपाशः १८,३२,३७,४३
कार्मबन्धः १०,११,३३
कार्ममलम् २
कार्यम् ५२
कार्यदशकम् ३
कालः (तत्त्वम्) ७,८,२०
कालाग्निभुवनम् १५
किञ्चिज्ज्ञत्वम् १८
किञ्चित्कर्तृत्वम् १८
कुण्डलिनी १६
कृष्णः (वासुदेवः) ३१
केचित् २८
कैवल्यम् ५२

कौमारम् (व्याकरणम्) ४८
कौलशास्त्रम् ३५,३६
क्रियापादः ३७
क्रियाशक्तिः ३३
क्रीडाब्रह्मवादिनः (वेदान्तिनः) २४,२६
क्षणिकः २८
क्षणिकविज्ञानम् ४५
क्षीणदोषः २९
गणेश्वरलक्षणम् ३९
गणेश्वराः १०
गर्गः ४८
गान्धर्ववेदः (उपवेदः) ४५,५१
गारुडशास्त्रम् (तन्त्रम्) ३४,३६
गीतवाद्यनृत्यानि ५१
गुणकर्म (चतुर्विधम्) ४६
गुणकर्मलक्षणम् ४६
गुणतत्त्वम् (सुखदुःखमोहात्मकम्) ६, ७,११,३०,३५
गुणत्रयम् (सत्त्वरजस्तमांसि) ५-६
गुणपदार्थः २१
गुणवादः ४६-४७
गुणविवेकः ६
गुणोपसंहारः ५०
गुरुनिन्दा ४३
गुरुवचनपालनम् ४२
गौतमः ४९
चतुर्दशभुवनानि ११
चतुष्पादं शास्त्रम् ३७
चतुष्षष्टिकलाशास्त्रम् ५२
चरकः ५१
चर्यापादः ३३,३७
चार्वाकः ४५
चिकित्साशास्त्रम् ५१
चित्तवृत्तिनिरोधः ५२
चित्सन्ततिः २८
छन्दांसि (सप्त) ४८
छन्दोविचितिः (अष्टाध्यायात्मिका) ३०,४८
जपः ३८-३९
जपमालालक्षणम् ३९
जलप्रवाहः २८
जीवः २९,५२
जीवन्मुक्तिः ५०
जीवब्रह्मैक्यम् ५०
जैमिनिः २०,४९
ज्ञानम् ११-१२,१८,४२
ज्ञानक्रियारूपः २,९
ज्ञानक्रियावारकः १७
ज्ञानगुणसंक्रान्तिः ३२
ज्ञानपादः ३७-३८
ज्ञानशक्तिः ३३
ज्ञानसन्ततिः २८
ज्ञानसन्ततिनाशः २८
ज्ञानेन्द्रियाणि (तेषां व्यापाराश्च) ३,५
ज्ञानोत्पत्तिः २१
ज्योतिष्टोमः १६,१९
ज्यौतिषम् ३०,४८
तत्त्वज्ञानम् ३५,४९
तत्त्वत्रयम् (अधिकार-भोग-लयाख्यम्) १३
तत्त्वाध्वा १५
तत्त्वानि (षट्त्रिंशत्) ३-१४
तत्त्वेश्वराः ३८
तत्त्वोत्पत्तिक्रमः ८
तत्पदार्थः ५०
तत्पुरुषः ३४,३७

तन्त्रम् ४९
तन्मात्रपञ्चकम् ३,५
तपः ११,२९,४२
तप्तशिलाशयनम् २९
तर्कः ५०
ताम्रकालिका ८
तार्किकादयः ४६,५२
तृणजलूकः २
त्रयस्त्रिंशत्कोटिदेवाः ११
त्रयीशब्दार्थः ५२
त्रिमुनिव्याकरणम् ४८
त्रिंशत्तत्त्वानि २
त्वंपदार्थः ५०
दक्षिणशास्त्रम् (तन्त्रम्) ३४,३६
दण्डम् ३९
दण्डनीतिः १९
दर्विहोमः ४६
दर्शपूर्णमासः ४६
दशाध्यायी (वैशेषिकशास्त्रम्) ४९
दाहकत्वम् ५
दिगम्बराः ४५
दिशः २०
दीक्षयैव मोक्षः ४२
दीक्षा १८,३१,३८,४०,४२,५१
दीक्षाः (विविधाः) ४०,४२
दीक्षितः ४३
दुःखान्तः ५२
दृष्टफलम् (शास्त्रम्) १९
दृष्टादृष्टफलम् (शास्त्रम्) १९
देवताकाण्डम् ४९
देवताधिकरणन्यायः ४७
देवताराधनम् ५१
देवतार्चनम् ५१
देवतासिद्धिः ५१
देवद्रव्याद्युपभोगः ४३
देहः (स्थूलः सूक्ष्मश्च) २,९
देहपरिमाणवादः ४५
देहात्मवादः ४५
दोषाः २९
द्रव्यलोपः ४२
द्रव्याणि (नव) २१
द्रव्यात्मका अध्वानस्त्रयः १५
द्राह्यायणः ४८
द्वादशमन्त्राणि १५
द्वादशाध्यायी (पूर्वमीमांसा) ४९
धनुर्वेदः (चतुष्पादः) ४५,५१
धनुर्वेदशास्त्रम् (विश्वामित्रप्रणीतम्) ५१
धनुःशब्दार्थः ५१
धन्वन्तरिः ५१
धर्मजिज्ञासा ४९
धर्मशास्त्रम् ४५,५१
धर्मशास्त्राणि (अष्टादश) ३०,५०-५१
धर्मार्थकाममोक्षहेतुः ४७
धर्माः (वर्णाश्रमीयाः) ३०
धारणम् ५
धारणा ३९
ध्यानम् ११,३९
नन्द्यादयोऽष्टौ गणेश्वराः ९-१०
नव द्रव्याणि २१
नादः (सकलः सूक्ष्मश्च) १४,३६
नानापथजुषः ५३
नारदः ५२
नास्ति २९
नास्तिकशास्त्राणि २६

नास्तिकाः २९,४५,५३
निगदमन्त्राः ४६
निघण्टुः (पञ्चाध्यायात्मको यास्कीयः) ४८
नित्यतृप्तता ४३
निदिध्यासनम् ५२
निन्दा (आचारस्य गुरोश्च) ४३
नियतितत्त्वम् ७,८
नियमलोपः ४२
नियमाः (पालनीयाः) ४२
निरञ्जनः १८
निरधिकरणः १०
निरोधशक्तिः १७
निरुक्तम् (त्रयोदशाध्यायात्मकम्) ३०,४८
निर्गुणब्रह्मविद्या ५०
निर्गुणं ब्रह्म ५०
निर्बीजदीक्षा ४१
निर्माल्यभक्षणम् ४३
निर्वाणम् २४
निर्वाणदीक्षा ४०
निर्वाणसंस्कारः ३८
निर्विकल्पसमाधिसिद्धिः ५१
निवृत्तिः (भुवनम्) ३६
निवृत्त्यादिपञ्चकलाः १५
निष्कलः १४
निष्कलशिवः १४
नीतिशास्त्रम् ५२
न्यायवैशेषिकम् १९,३५,४५
न्यायशास्त्रम् २२,२६,४९
पञ्च(कञ्चु)कम् ८
पञ्चकृत्यम् ४३,४४
पञ्चब्रह्ममन्त्राः १५
पञ्चभूतवृत्तिः ५
पञ्चभूतानि ३,५
पञ्चाध्यायी (न्यायशास्त्रम्) ४९
पञ्चाध्यायी (पाशुपतशास्त्रम्) ५२
पतञ्जलिः २४,४८,५२
पतिः ५२
पतिभूमिः १२
पदजातं चतुर्विधम् (नामाख्यातनिपातोपसर्गात्मकम्) ४८
पदाध्वा १५
पदानि (एकाशीतिः) १५
पदानि (विविधानि) ३६
पदार्थनामानि (षोडश) ४९
पदार्थाः (षट्, सप्त वा) १९,२१,४९
पदार्थाः (षोडशविधाः) २२,४९
परतत्त्वम् ३०-३१
परपक्षनिराकरणम् ५०
परब्रह्म २५
परमाणवः (चतुर्विधाः) २०,५२
परमुक्तः १३
परमेश्वरः १०,१२-१३, ३८,४३-४४,५३
परमेश्वरप्रसादः १२
परमेश्वरसाम्यम् ४०
परलोकगमनम् ५०
परानुग्रहः ४४
परिणामः २४
परिणामवादः ५२
परिणामवादी ३१
परीक्षा ४९
पर्वद्वयात्मकम् ५०
पवित्रारोपणम् ३९,४२
पशुः (त्रिविधः) १,१०,१६,५२

पशुपतिः ५२
पशुपाशविमोक्षणम् ५२
पशुभूमिः १२
पाञ्चरात्रशास्त्रम् ३०-३१, ३५,४०,५२
पाणिनिः ४७-४८
पाणिनिशिक्षा ४७
पातञ्जलशास्त्रम् १९,२४, २६,३१,४०,४५,५३
पादचतुष्टयम् (क्रिया-चर्या-ज्ञान-योगाख्यम्) ३७
पाशः १७,५२
पाशचतुष्टयम् १७
पाशपञ्चकम् १-२,१७,३७,४३,५२
पाशुपतशास्त्रम् (पञ्चाध्यायम्) १९, ३१-३४,३६,३८,४५,५२-५३
पाषाणकल्पः (मोक्षः) २१
पिङ्गलः (छन्दःशास्त्रप्रणेता) ४८
पिशाचादिपदम् ३६
पुत्रकः ४१
पुरद्विष् १
पुराणानि (पञ्चलक्षणान्यष्टादश) ३१, ४५,४९
पुरुषः २,८,३०,३५
पुरुषतत्त्वम् ८,३५
पुरुषार्थः ३१,४५
पुर्यष्टकम् १६
पूजनम् ३८
पूजाविधिः १२
पृथिवीतत्त्वम् ७,२३,२७,३७
पौराणिकाः ३५
पौष्टिककर्म ४७
प्रकृति(तत्त्वम्) ७,११,३०,३५,४०
प्रकृतिपुरुषविवेकज्ञानम् ३५,५२
प्रकृतिमस्तकम् १२
प्रकृतिलक्षणम् २३-२४
प्रकृतिविधिः ४६
प्रजापतिः (आयुर्वेदज्ञः) ५१
प्रणवः १३,३६
प्रतिध्वनिः ६
प्रतिष्ठा (भुवनम्) ३६
प्रत्यक्षम् २७
प्रत्याहारः ३९
प्रद्युम्नः (मनः) ५२
प्रधानकर्म ४६
प्रपञ्चः २०
प्रमाणम् १९,२२,२७
प्रमेयाः २२,३०-३१,३८
प्रयोगविधिः ४६
प्रयोगाः (विविधाः) ४७-४८
प्रलयः (त्रिविधः) ११,३८
प्रलयकलाः १०,१६,३७
प्रवाहानादिः १८
प्रस्थानभेदः (त्रिविधः) ५२
प्रस्थानानि (षट्) ४५
प्राकृतं शरीरम् १२
प्राणादिवायवः ४
प्राणायामः ३९
प्रातिशाख्यम् ४७
प्राभाकराः ४६
प्रामाण्यलक्षणम् ४७
प्रायश्चित्तम् ३०,३९,४२
बन्धः (मलः) १६-१७,२४
बन्धः (पञ्चविधः) १८

बन्धत्रयम् (आणव-कार्म-मायाख्यम्) ११
बन्धलक्षणम् १७,३३
बहिरङ्गसाधनानि ५०
बादरायणः ४९
बाधः ४९
बाह्यार्थवादः ४५
बिन्दुः (सकलः) १३-१४,३६
बिन्दुलक्षणम् १४
बिन्दुशक्तिः ३६
बीजम् १४
बुद्धिः ४
बुद्धितत्त्वम् ६,१६,२३,२७-२८,३५
बुद्धिवृत्तिः ४
बृहस्पतिः २७
बैन्दवबन्धलक्षणम् १७
बैन्दवमलम् २
बैन्दवशरीरम् १२
बैन्दवः पाशः १८,३७,४३
बौद्धशास्त्रम् २७-२८,३५
बौद्धाः (चतुर्विधाः) २८
बौधायनः ४८
ब्रह्म (सगुणं निर्गुणं च) १६,५०
ब्रह्मकाण्डम् ४७
ब्रह्मजिज्ञासा ५०
ब्रह्मपरिणामः २४
ब्रह्ममन्त्राः (पञ्च) १५
ब्रह्मलक्षणम् २४-२५
ब्रह्मलोकः ५०
ब्रह्मवादिनः ५३
ब्रह्मविद्या (सगुणा निर्गुणा च) ५०
ब्रह्मविष्णुपदम् १२
ब्रह्महत्या १६
ब्रह्मा ११,१२
ब्रह्मा (आयुर्वेदज्ञः) ५१
ब्रह्माण्डम् ११,५२
ब्रह्माण्डपतिः १२
ब्राह्मणभागः ३०
ब्राह्मणं त्रिविधम् ४६-४७
ब्राह्मप्रयोगः ४७
भगवान् ५२
भरतः (गान्धर्ववेदकृत्) ५१
भाट्टाः ४६
भास्करीयाः (वेदान्तिनः) २४,३५
भिक्षा ३३
भुवनपरिमाणम् ३८
भुवनाध्वा १५
भुवनानि (चतुर्दश) ९,११,१३
भुवनानि (अनाश्रितादिकालाग्न्यन्तानि) १५,३७
भुवनानि (निवृत्त्यादिचतुष्कलानाम्) ३६
भुवनेश्वराः ३७
भूतप्रेतपिशाचचिकित्सा ३४
भूतशास्त्रम् (तन्त्रम्) ३४,३६
भूतहिंसा ४३
भूतानि (चत्वारि) २०,३५
भूतानि (सूक्ष्माणि स्थूलानि च) २,३
भूतार्थवादः ४६-४७
भेदशास्त्राणि (पञ्च) २६
भोक्ता २,८,१३
भोगः १८,३८,४१
भोगतत्त्वम् १३
भोगपरिकरीभूतः २-३
भोगपरिच्छेदः ७
भोगसाधनम् ३७

मकरध्वजः (प्रद्युम्नः) ३१
मङ्गलकरणम् ५१
मत्स्येन्द्रनाथः ३५
मध्यमप्रलयः १०-११,३८
मनः ४,२०
मनुप्रभृतयः ३०
मनुष्यकपालः ३३
मनोवृत्तिः ४
मन्त्रप्रयोजनम् ४८
मन्त्रभागः ३०
मन्त्रयोगः ३४
मन्त्रलक्षणम् ४५
मन्त्रलोपः ४२
मन्त्रसाधकाः १३
मन्त्रसिद्धिः ५१
मन्त्रः स्वरहीनः ४७
मन्त्राध्वा १५
मन्त्राः (त्रिविधाः) ४५-४६
मन्त्राः (मूल-ब्रह्म-अङ्गात्मकाः) १५,४६
मन्त्रोद्धारः ३८
मन्त्रौषधम् ३४
मन्वन्तरम् ३१
मलम् (त्रिविधम्) २,१०,१७
मलपाकः १०,१२
मलसद्भावः ८
मलस्वरूपम् १७
महर्षयः ३०
महाप्रलयः ३८
महाभारतम् ३१,४५,५१
महाभाष्यम् ४८
महाभूतसृष्टिः ५०
महामाया ३८
महायानिकः २८
महाव्रतशास्त्रम् १९,३३-३४, ३६,३८
महासंहारः १३,४१
महेश्वरः ४८
माहेश्वरपूजा ४२
मातृका ३६
माध्यमिकाः २८,४५
मान्त्रशास्त्रम् (पञ्चविधम्) १९,३४-४९
माया (जगदुपादानम्) २५,३८
माया (शुद्धाऽशुद्धा च) ९,१६,५३
मायाक्षोभकः १०
मायातत्त्वम् ८-१०,३६
मायातत्त्वलक्षणम् ९
मायातत्त्ववासिनः ३४
मायाबन्धः ११,१६,३३
मायामलम् ३२
मायावादिनः (वेदान्तिनः) २४-२५
मायीयमलम् २
मायीयं शरीरम् १२
मायीयः पाशः १८,३७,४३
माहेश्वरम् (व्याकरणम्) ४८
मिथ्या ५३
मिश्राध्ववर्तिनः १७-१८,३५,४०
मिश्राध्वा (पञ्चतत्त्वात्मकः) ७-८, १२,१८
मीमांसाशास्त्रम् (द्विविधम्) १९-२०, २६,४५,४९
मीमांसकाः ५३
मुक्तः (मुक्ताः) १३,३१,३३,४१
मुक्तात्मनो लक्षणम् ४३
मुक्तिदशा २३

मुनयः ५२-५३
मूलाधारः ३९
मोक्षः २१-२२,२६,
२८,३१,३३,४०-४२,५२
मोहकम् ९
म्लेच्छप्रस्थानम् ४५
यजुर्लक्षणम् ४६
यमनियमसम्पत्तिः ४२
याजमानप्रयोगः ४७
याज्ञवल्क्यः ४५
यामलशास्त्रम् ३५-३६
यास्कः ४८
योगः ११-१२,१८,
२४,३४,४२,५२-५३
योगपट्टः ३९
योगपरिकरः २४
योगपादः ३७-३८
योगशास्त्रम्(पादचतुष्टयात्मकम्) ५२-५३
योगाङ्गानि (षट्) ३९
योगाङ्गान्यष्टौ (यमनियमादीनि) ५२
योगाचाराः (विज्ञानवादिनः) ४५
रजतम् २५
रसवादः ३४
रागतत्त्वम् ७-८,११-१२,३५,४०
रामायणम् ४५,५१
रुद्रपदम् १२,४०
रुद्रप्रणीतम् १९
रुद्रभट्टारकः ११
रुद्रभेदाः ३६
रुद्राः (अष्टादश) ३७
रुद्राः (अष्टादशाभ्यधिकशतम्) १०-१२
रुद्राः (शतम्) ११-१२,३४
रोधशक्तिः २,३७,४३
रौहिणेयः (बलभद्रः) ३१
लक्षणम् ४९
लयः २५,३१
लयतत्त्वम् १३
लाट्यायनः ४८
लोकपालाः (इन्द्रादयः) १०
लोकायतशास्त्रम् २७,३५
लोकायतिकम् २७
लौकिकशास्त्रम् (द्विविधम्) १९
वर्णः २
वर्णधर्माः ३०,५१
वर्णपदमन्त्राध्वानः १५-१६
वर्णविग्रहः १
वर्णात्मकः (शब्दः) ६
वर्णाध्वा १५
वस्तुराशिः २८
वंशः ३१
वंशानुचरितम् ३१
वाक्यलक्षणम् २०
वाक्यविचारः ५०
वागादिपञ्चकम् ४
वाग्भटः ५१
वाग्वज्रः ४७
वाजीकरणम् ५१
वात्स्यायनः (कामशास्त्रकर्ता) ५१
वामदेवः ३४,३७
वामशास्त्रम् (तन्त्रम्) ३४,३६
वायवः (प्राणादयः) ४
वार्त्तिकम् ४८
वाल्मीकिः ५१
वासुदेवः (परमेश्वरः) ३०,३१,५२

वासुदेवः (पञ्चविंशं तत्त्वम्) ३०
विकारः २५
विकृतिकर्म ४६
विकृतिविधिः ४६
विक्षिप्तचित्तम् ५२
विजयम् (आगमः) ३७
विज्ञानम् १८
विज्ञानकेवलः (पशुः) ३४
विज्ञानकैवल्यम् ३५
विज्ञानाकलाः १६,३७
विदेहकैवल्यम् ५०
विद्या (अशुद्धा शुद्धा च) १७
विद्याः (अष्टादश) ४५
विद्याः (चतुर्दश) ४५
विद्यातत्त्वम् ७-८,१३,३६
विद्यातत्त्ववासिनः ३४
विद्याभुवनम् ३६
विद्येश्वरतत्त्वम् १०
विद्येश्वरादिपदानि ४१
विद्येश्वराः (अनन्तादयोऽष्टौ) १०, १२-१३,१७
विधिः (चतुर्विधः) ४६-४७,५२
विधिनिषेधौ ४२-४३
विधिभागः ३०,४२-४३
विधिभागनिरूपणम् ४६
विधिलक्षणम् ४६
विनियोगविधिः ४६
विभूतयः ५२
विवर्तवादः ५२-५३
विविधपदप्राप्तिः ४०
विवेकज्ञानम् २३-२४,३५
विशेषनिर्देशः ४९
विशेषपदार्थः २१
विशेषसंस्कारः ४०
विश्वामित्रः (धनुःशास्त्रकर्ता) ५१
विष्णुः ११-१२
वीरभद्रः १२
वेदः (मन्त्रब्राह्मणात्मकः) १९, ३१,४५,४७
वेदबाह्यम् २६,२९,४५,५३
वेदलक्षणम् ४५
वेदव्यासः ३१
वेदशाखाः ४७
वेदा अपौरुषेयाः १९-२०
वेदा ईश्वरकर्तृकाः २१
वेदाः (चत्वारः) ३०,४५,५१
वेदाङ्गानि (षट्) ३०,४५,४८-४९
वेदान्तम् १९,२६,३१,४०,४५
वेदान्तज्ञानम् २५
वेदान्तवाक्यम् ४७
वेदान्तवादिनः २४
वेदान्तिनः (चतुर्विधाः) २४,३५
वैखरी (वाणी) १३,१७
वैदिकधर्माः ३१
वैदिकशास्त्रम् (त्रिविधम्) १९
वैदिकशास्त्राणि (षट्) २६,३०
वैधर्म्यम् ४९
वैभाषिकाः २८,४५
वैराग्यम् १३,३२,५०
वैशेषिकशास्त्रम् २०-२२,२६,४५,४९
वैष्णवाः ४५,५३
व्यक्तमहेश्वरः १४
व्यक्तलिङ्गलक्षणम् ३९
व्यक्ताव्यक्तः १४

व्यक्ताव्यक्तसदाशिवः १४
व्यवहारः ३०
व्याकरणम् ३०,४८
व्यासः २६,५१
व्यूहाः (चत्वारः) ३१,५१-५२
व्योमव्यापी (पदेष्वाद्यः) १५
शकुनविचारः ५१
शक्तयः २,८,३३,३६
शक्तितत्त्वम् १३-१४,३६-३८
शक्तितत्त्ववासी ३५
शक्तिद्वयम् (ज्ञानक्रियाख्यम्) ९,३३
शक्तिपरिणतिः ३५
शङ्करभगवत्पादः ५०
शब्दः (प्रतिध्वनि-वर्णात्मकः) ६
शब्दब्रह्म २६
शब्दब्रह्मवादिनः (वेदान्तिनः) २४,२६
शब्दरूपा अध्वानस्त्रयः १५
शब्दार्थात्मकः १४
शरीर एवात्मा २७
शरीरम् (प्राकृतं मायीयं बैन्दवं च) २,१२
शशविषाणम् २५
शरीरम् (पाञ्चभौतिकम्) २७,४१
शस्त्रम् ५१
शाक्तं तन्त्रम् ३५
शाङ्खायनः ४८
शान्तिक कर्म ४७
शान्तिभुवनम् ३६
शारीरकमीमांसा (चतुरध्यायी) ४९-५०
शास्त्रम् १८
शास्त्रतारतम्यम् ३५
शास्त्राणि (षट्) २६
शास्त्राणि (नानाविधानि) १९-३७, ५१-५२
शास्त्राणि (पञ्चविधानि) १९-२६, ३२-३४,३६-३७
शास्त्रोक्तचर्या ३३
शिक्षा ३०,४७-४८
शिक्षालक्षणम् ४७
शिल्पशास्त्रम् ५२
शिवतत्त्वम् १३-१४,३७
शिवनिन्दा ४३
शिवप्रणीतम् १९,३५
शिवभक्तिः ४१
शिवभेदाः ३६
शिवलिङ्गलक्षणम् ३९
शिवलिङ्गार्चनम् ४१-४२
शिवशक्तिः १७
शिवशास्त्रप्राप्ताचारनिन्दा ४३
शिवाः (दश) ३७
शुक्तिका २५
शुद्धचित्सन्ततिः २८
शुद्धविद्या(तत्त्वम्) ९,१६
शुद्धशाक्ताः ३६
शुद्धाध्ववर्तिनः १७-१८
शुद्धाध्वा १८
शून्यवादः ४५
शैवाः ३१
श्यामध्वजा ३३
श्यामपताका ३३
श्रवणम् ५०
श्रीकण्ठरुद्रः १०,१२
श्रोत्रादिपञ्चकम् ४
श्रौतः ४६

षट्त्रिंशत्तत्त्वानि १४-१५,३७-३८
षट्प्रस्थानानि ४५
षट्शास्त्राणि २६,३०
षडध्वानः १५-१६
षड्विधतात्पर्यलिङ्गम् ४७
षड्विंशतितत्त्वम् (ईश्वरः) २४
षाड्गुण्यम् (सर्वज्ञतादिकम्) ४३
षाड्गुण्यस्वरूपप्राप्तिः ४३
सकलस्वरूपम् १२
सकलः (शिवः) १४
सकलाः (पशवः) ११,१६-१७,३७
सकलासकलः (सदाशिवः) १४
सगुणब्रह्मविद्या ५०
सगुणं ब्रह्म ५०
सङ्कर्षणः (जीवः) ५२
सङ्कर्षणकाण्डम् (अध्यायचतुष्टयात्मकम्) ४९
सत्यम् २५,२७
सत्यः २८
सत्या २५
सदाशिवतत्त्वम् १३-१४
सद्योजातः ३४,३७
सद्योनिर्वाणदीक्षा ४०
सन्निपत्योपकारकम् ४६
सन्ध्यावन्दनम् ३८,४१-४२
सप्तकोटिमहामन्त्राः ९
सबीजदीक्षा ४१
समन्वयः ५०
समयविशेषाः ३८
समयसंस्कारः ४०
समयी (दीक्षितः) ४१
समवायपदार्थः २१
समाधिः ३९,५२
समूहीकरणम् ५
सर्पचिकित्सा ३४
सर्वकर्तृता ४३
सर्वज्ञता १८,४३
सर्वात्मशम्भुः ४४
सहजमलशक्तिः ८
संन्यासः १८
संसारदशा २३,३३
संसारः १६,२५,३५
संसारी २
संस्कारः (अपूर्वाख्यः) १६,४०,४६
संस्कृतिकर्म ४६
सांख्यशास्त्रम् (षडध्यायात्मकम्) २३, २६,३१,३५,४०,४५,५१-५३
साञ्जनः १८
साधकदीक्षा १३,४१
साधकः (दीक्षितः) ४१
साधननिरूपणम् ५०
साधनानि (अन्तरङ्ग-बहिरङ्गात्मकानि) ५०
साधर्म्यम् ४९
साधर्म्यवैधर्म्यज्ञानम् २१,४९
सामलक्षणम् ४६
सामान्यपदार्थः २१
सामान्यातिदेशः ४९
साम्यम् ४०
साम्यावस्था (गुणानाम्) २३
सिद्धयः (अणिमादिकाः) ३९
सिद्धान्तप्रकाशिका ४४
सिद्धान्तशास्त्रम् (द्विविधम्) १०, १९,३४,३६
सिद्धाः ३५
सिद्धान्तः ३७

सुखदुःखमोहाः	६,१६,१८	सौत्रान्तिकः	२८,४५
सुगतः	२८	स्थूलदेहः (शरीरम्)	२,२९
सुश्रुतम् (पञ्चस्थानं शास्त्रम्)	५१	स्मृतिकारनामानि	५०
सूक्ष्मदेहः (शरीरम्)	९	स्रोतांसि	३४,३६
सूक्ष्मनादः	१४	स्वपक्षस्थापनम्	५०
सूक्ष्मभूतानि	२	स्वर्गनरकौ	२७
सूक्ष्मा वाक्	१७	स्वाधिकारः	३२
सूपशास्त्रम्	५२	स्वाधिष्ठानता	२४
सृष्टिप्रकारः	३७-३८	हिंसा	२९
सृष्ट्यादिपञ्चकृत्यम्	४३	होमः	३८
सौगताः	४५	हौत्रप्रयोगः	४७-४८

❋ ❋ ❋

सहायक-ग्रन्थसूची

अनुभवसूत्रम् — तन्त्रसंग्रह, भा.१, पृ. १२९-१७४, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी, सन् १९७०

अमरकोशः — सुधाव्याख्यासहितः, निर्णयसागर प्रेस, बम्बई, सन् १९२९

अष्टप्रकरणम् — तत्त्वप्रकाश-तत्त्वसंग्रह-तत्त्वत्रयनिर्णय-रत्नत्रय-भोगकारिका-नादकारिका-मोक्षकारिका-परमोक्षनिरासकारिकाख्यप्रकरणाष्टकात्मकम्, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी, सन् १९८८

अहिर्बुध्न्यसंहिता — पांचरात्र आगम (दो भाग), अड्यार लाइब्रेरी, मद्रास, द्वितीय संस्करण, सन् १९६६

आगम और तन्त्रशास्त्र — प. व्रजवल्लभ द्विवेदी, परिमल पब्लिकेशंस, दिल्ली, सन् १९८४

ऋग्वेदः — मूलमात्रम्, सातवलेकर संस्करण, स्वाध्याय मण्डल, पारडी (जि. बलसाड़)।

ऐतरेयारण्यकम् — आनन्दाश्रम संस्कृत सिरीज, पूना, संवत् १९९८

कर्मकाण्डक्रमावली — (सोमशम्भुपद्धतिः), कश्मीर ग्रन्थावली, श्रीनगर, सन् १९४७

कामसूत्रम् — जयमङ्गलाटीकासहितम्, काशी संस्कृत सिरीज, वाराणसी, सन् १९८६

किरणागमः — विद्यापादः, ओरियण्टल इंस्टीट्यूट, नेपोली (इटली), सन् १९७५

कूर्मपुराणम् — मनसुखराय मोर, कलकत्ता, सन् १९६२

कूर्मपुराण : धर्म और दर्शन — डॉ. करुणा एस. त्रिवेदी, मोतीलाल बनारसीदास, वाराणसी, सन् १९९४

गणकारिका — गायकवाड़ ओरियण्टल सिरीज, बड़ोदा, सन् १९६६

चन्द्रज्ञानागमः — शैवभारती शोध प्रतिष्ठान, जंगमवाड़ी मठ, वाराणसी, सन् १९९४

जयाख्यसंहिता — पांचरात्र आगम, गायकवाड़ ओरियण्टल सिरीज, बड़ोदा, द्वितीय संस्करण, सन् १९६७

तत्त्वप्रकाशः — अष्टप्रकरण द्रष्टव्य।

तत्त्वसंग्रहः — अष्टप्रकरण द्रष्टव्य।

तन्त्रयात्रा — प. व्रजवल्लभ द्विवेदी, रत्ना पब्लिकेशंस, कमच्छा, वाराणसी, सन् १९८३

तन्त्रालोकः — विवेकव्याख्यासहितः (१२ भाग), कश्मीर संस्कृत ग्रन्थावली, श्रीनगर, सन् १९१८-३८

तान्त्रिक वाङ्मय में शाक्तदृष्टि — म. म. गोपीनाथ कविराज, बिहार राष्ट्रभाषा परिषद्, पटना, सन् १९६३

धर्मशास्त्र का इतिहास — हिन्दी अनुवाद, पंचम खण्ड, हिन्दी समिति, लखनऊ, सन् १९७५

नादकारिका — अष्टप्रकरण द्रष्टव्य।

नामसंगीति — सटीका, सम्पा. डॉ. बनारसीलाल, केन्द्रीय उच्च तिब्बती शिक्षा संस्थान, सारनाथ, वाराणसी, सन् १९९४

निगमागम संस्कृति — प. व्रजवल्लभ द्विवेदी, वीरशैव अनुसन्धान संस्थान, जंगमवाड़ी मठ, वाराणसी, सन् १९९२

निगमागमीयं संस्कृतिदर्शनम् — शैवभारती शोध प्रतिष्ठान, जंगमवाड़ी मठ, वाराणसी, सन् १९९५

नेत्रतन्त्रम् — उद्योतसहितम्, परिमल पब्लिकेशंस, दिल्ली, सन् १९८५

न्यायमञ्जरी — जयन्तभट्टविरचिता, काशी संस्कृत सिरीज, वाराणसी, दो भाग, सन् १९३४

न्यू कैटलाग्स कैटलागरम् — (१३ भाग) मद्रास विश्वविद्यालय, मद्रास, सन् १९६८-१९९१

परमार्थसारः — योगराजकृतवृत्तिसहितः, कश्मीर संस्कृत ग्रन्थावली, श्रीनगर, सन् १९१६

परमोक्षनिरासकारिका — अष्टप्रकरण द्रष्टव्य।

पातञ्जलयोगसूत्रं सभाष्यम् — आनन्दाश्रम मुद्रणालय, पूना, सन् १९३२

पाशुपतसूत्रं सभाष्यम् — त्रिवेन्द्रं संस्कृत ग्रन्थमाला, त्रिवेन्द्रम्, सन् १९४०

पौराणिक कोश — ज्ञानमण्डल मुद्रणालय, वाराणसी, सन् १९८६

प्रशस्तपादभाष्यम् — व्योमशिवकृतव्योमवतीव्याख्यासहितम्, चौखम्बा संस्कृत सिरीज, बाराणसी, सन् १९२४-३१

प्रशस्तपादभाष्यम् — श्रीधरभट्टकृतन्यायकन्दलीटीकासहितम्, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी, सन् १९६३

ब्रह्मसूत्रभाष्यम् — भास्कराचार्यविरचितम्, चौखम्बा संस्कृत सिरीज, वाराणसी, सन् १९१५

ब्रह्मसूत्रभाष्यम् — शङ्कराचार्यभगवत्पादविरचितम्, मूलमात्र, निर्णयसागर प्रेस, बम्बई, सन् १९४८

भगवद्गीता — गीता प्रेस, गोरखपुर संस्करण।

भागवतमहापुराणम् — गीता प्रेस, गोरखपुर संस्करण, संवत् २०१०

भारतीय तन्त्रशास्त्र — (कार्यशाला विवरण) दुर्लभ बौद्ध-ग्रन्थ शोधयोजना, केन्द्रीय उच्च तिब्बती शिक्षा संस्थान, सारनाथ, वाराणसी, सन् १९९६

भोगकारिका — अष्टप्रकरण द्रष्टव्य।

मतङ्गपारमेश्वरागमः — पादचतुष्टयात्मक, फ्रेंच शोध संस्थान, पाण्डिचेरी, दो भाग, सन् १९७७, ८२

मनुस्मृतिः — भाषानुवाद, निर्णयसागर प्रेस, बम्बई, सन् १९२९

महाभारतम् — गीता प्रेस, गोरखपुर संस्करण।

महिम्नःस्तोत्रम् — मधुसूदनीव्याख्यासहित, निर्णयसागर प्रेस, बम्बई, सन् १९३०

मुण्डकोपनिषद् — उपनिषत्संग्रह, मोतीलाल बनारसीदास, वाराणसी, सन् १९७०

मृगेन्द्रवृत्तिदीपिका — विद्यापादयोगपादौ, शिवागमसिद्धान्तपरिपालनसंघ, देवसालपुरी, तमिलनाडु, सन् १९२८

मृगेन्द्रागमः — विद्यापादयोगपादौ, कश्मीर संस्कृत ग्रन्थावली, श्रीनगर, सन् १९३०

मोक्षकारिका — अष्टप्रकरण द्रष्टव्य।

याज्ञवल्क्यस्मृतिः — स्मृतिसन्दर्भ, भा. ३, मनसुखराय मोर, कलकत्ता, सन् १९५२

योगिनीहृदयम् — अमृतानन्दकृतदीपिकासहितम्, मोतीलाल बनारसीदास, वाराणसी, सन् १९८८

रत्नत्रयम् — अष्टप्रकरण द्रष्टव्य।

लिङ्गधारणचन्द्रिका — शैवभारती भवन, जंगमवाड़ी मठ, वाराणसी, सन् १९८८

लुप्तागमसंग्रहः — सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी, द्वितीय भाग, सन् १९८३

वसन्ततिलका — कृष्णाचार्यकृता सव्याख्या, (बौद्ध तन्त्र), केन्द्रीय उच्च तिब्बती शिक्षा संस्थान, सारनाथ, वाराणसी, सन् १९९०

वामनपुराणम् — नाग पब्लिकेशंस, दिल्ली, सन् १९८३

वायवीयसंहिता — शिवपुराणस्था, पण्डित पुस्तकालय, काशी, संवत् २०२०

विज्ञानभैरवः — भाषानुवादसहितः, सम्पा. प. व्रजवल्लभ द्विवेदी, प्रका. मोतीलाल बनारसीदास, वाराणसी, सन् १९८४

शतरत्नसंग्रहः — उमापतिशिवाचार्यप्रणीतः, आगमानुसन्धान समिति, कलकत्ता, सन् १९४४

शिवपुराणम् — पण्डित पुस्तकालय, काशी, संवत् २०२०

शुक्लयजुर्वेद-माध्यन्दिनसंहिता — उव्वटमहीधरभाष्यसहिता, मोतीलाल बनारसीदास, वाराणसी, सन् १९८७

शैवपरिभाषा — शिवाग्रयोगीन्द्रविरचिता, मैसूर विश्वविद्यालय ग्रन्थमाला, मैसूर, सन् १९५०

षड्दर्शनसमुच्चयः — हरिभद्रसूरिविरचितः, गुणरत्नकृतव्याख्यासहितः, भारतीय ज्ञानपीठ प्रकाशन, वाराणसी, सन् १९७०

सर्वदर्शनसंग्रहः — सायणमाधवविरचितः, आनन्दाश्रम मुद्रणालय, पूना, सन् १९२८

सांख्यकारिका — सांख्यतत्त्वकौमुदीसहिता, चौखम्बा संस्कृत सिरीज, वाराणसी, सन् १९३२

सांख्यदर्शनम् — व्याख्याचतुष्टयोपेतम्, मोतीलाल बनारसीदास, वाराणसी, सन् १९८९

सात्वतसंहिता — अलशिङ्गभट्टप्रणीतभाष्यसहिता, पांचरात्र आगम, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी, सन् १९८२

सिद्धान्तशिखामणिः — सव्याख्या, शैवभारती भवन, जंगमवाड़ी मठ, वाराणसी, सन् १९९३

सिद्धान्तसारावलिः — त्रिलोचनशिवाचार्यकृता, कन्नड़भाषानुवादसहिता, मैसूर, सन् १९३०

सिद्धान्तसारावलिः — अनन्तशम्भुरचितव्याख्यासहिता, गवर्नमेन्ट ओरियण्टल मैन्युस्क्रिप्ट लाइब्रेरी बुलेटिन, मद्रास, भा. १७-२०

सोमशम्भुपद्धतिः — कर्मकाण्डक्रमावली द्रष्टव्य।

स्वच्छन्दतन्त्रम् — क्षेमराजकृतव्याख्यासहितम्, दो भाग, परिमल पब्लिकेशंस, दिल्ली, सन् १९८५

हस्तलिखित ग्रन्थ-सूची — फ्रेंच शोध संस्थान, पाण्डिचेरी, तीन भाग, सन् १९८६, ८७, ९०

हिस्ट्री आफ शैव कल्ट्स इन नार्दर्न इण्डिया — अविनाश प्रकाशन, इलाहाबाद, सन् १९८०

हेवज्रतन्त्रम् — योगरत्नमालाव्याख्यासहितम्, (बौद्ध तन्त्र), सम्पा. डॉ. डी. एल. स्नैलग्रोव, २ भाग, आक्सफोर्ड युनिवर्सिटी, पुनर्मुद्रित, सन् १९८०

* * *